श्रीमते लक्ष्मीनृसिंहपरब्रह्मणे नमः ॥
श्रीमते श्रीवण्शठकोपश्रीवेदान्तदेशिकयतीन्द्रमहादेशिकाय नमः ॥
श्रीमते श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवक श्रीवण्शठकोपश्रीनारायणयतीन्द्रमहादेशिकाय नमः॥
श्रीमते श्रीवण्शठकोपश्रीरङ्गनाथयतीन्द्रमहादेशिकाय नमः ॥

# श्रीमधुरान्तकक्षेत्रस्थस्य श्रीमदहोबिलमठीय आदर्श संस्कृत महाविद्यालयस्य पञ्चसप्ततिवर्षसमाप्तिमहोत्सवाभिनन्दनम्

'अध्यासीनतुरङ्गवक्रविलसज्जिह्वाग्रसिंहासनादाचार्यादिह देवतां समधिकामन्यां न मन्यामहे । यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥' इति, 'श्रीमान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् । मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥' इति, 'गुरुरसि गतिश्चासि जगताम्' इति च प्रमाणैः भगवतः संसारिचेतनोद्दिद्धीर्षया आचार्यरूपेण अवतीर्य हितप्रवर्तनं सुविदितमेव। तथा श्रीमतः नृसिंहस्य, 'त्वं गतिस्त्वं मतिर्मह्यं पिता माता गुरुः सखा । सुहृदश्चात्मरूपस्त्वं त्वां विना नास्ति मे गतिः ॥' इति, श्रीनृसिंहपुराणस्थमार्कण्डेयोक्त तत्सहस्रनामस्तोत्रादवगतं सर्वविधबन्धुत्वम् । स च श्रीनृसिंहः अनाद्यविच्छिन्नाचार्यपरम्परया, 'विष्णुश्रीपृतनापतीन् शठरिपुश्रीनाथपद्मेक्षणान् रामं यामुनपूर्णमिश्रयतिराड्गोविन्दभट्टारकान् । वेदान्त्याख्यमुनिं कलिप्रमथनं श्रीकृष्णपादाभिधं श्रीरङ्गेश्वरकेशवार्यकमलावासान् भजे केशवम् ॥ केशवार्यकृपापात्रम्' इत्यादिक्रमेण श्रीमहोबिलमठास्थाने, 'यत्कटाक्षेण सर्वेऽपि यत्स्थानागतयोगिनः । श्रीनृसिंहदयापूर्णाः तन्मुनेः मङ्गळं सदा ॥' इति प्रतिपादितवैभवैः आचार्यवर्यैः अद्यापि लोकहितं प्रवर्तयति ।

ईदृशमहिममहितेषु आचार्यवर्येष्वन्यतमैः तदास्थाने द्विचत्वारिंशपट्टे मूर्धाभिषिक्तैः विश्वविख्यातवैदुष्यैः श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवक श्रीवण्शठकोपश्रीश्रीरङ्गशठकोपयतीन्द्रमहादेशिकैः सत्यसङ्कल्पैः अन्यादृशं लोकोत्तरं कार्यत्रयं 'शुभेन मनसा ध्यातम्' इतिवत् आरचितम् । तत्र च 'श्रीनृसिंहप्रिया' नाम्नी सम्प्रदायप्रबोधिनी मासिकी पत्रिका, 'श्रीमन्मालोलविद्वत्सभा' इति प्रथिता गरीयसी विदुषां 'सन्तोषार्थं विमृशति मुहुः सद्भिरध्यात्मविद्यां नित्यं ब्रूते निशमयति च स्वादु सुव्याहृतानि' इत्युक्तपरमैकान्ति- प्रपन्नोत्तरकृत्यसाधिका ब्रह्मविचारगोचरा, तथा चैतयोर्द्वयोः पोषणाय सदाचारयुक्तसम्प्रदायक्रमेण शास्त्रविदुषाम् अध्ययनाध्यापन सौकर्यकल्पिका कल्पलतेव काचित् कलाशाला श्रीमतां भगवद्भाष्यकाराणां मन्त्रोपदेशदिव्यक्षेत्रभूते करुणाकरस्य भगवतो नित्यसान्निध्ययुक्ते श्रीमति मधुरान्तके प्रशान्तपर्यावरणयुक्ते वैदिकानुष्ठानाय अत्यन्तमुपयुक्ते स्थाने निर्मिता मालोलकृपापोषिता 'वेदप्रबन्धशास्त्रपाठशाला' च अन्तर्भवन्ति । आचार्यैरेतैः स्वस्य पूर्वाश्रमे ज्ञानपिपासुभिः आसेतुहिमाचलं तत्रतत्रस्थितानां महतां सकाशात् प्रणिपातपरिप्रश्नसेवादिना समधिगतसर्वार्थैः उत्तरकालभाविछात्राणां तादृशक्लेशं विना एकत्रैव सर्वज्ञानस्रोतः समावेशकल्पनाय स्थापिता कलाशाला एषा पञ्चसप्ततिसंवत्सरेषु त्रिशताधिकपण्डितानां समुन्नतज्ञानवितरणेन साफल्यं भजते । ईदृशप्रभावयुक्तायाः कलाशालायाः आधुनिकसमये विदुषाम् अधिकाधिकसंख्यया प्रशिक्षणं तैः एतत्कालीनयूनां विशिष्य साम्प्रदायिकज्ञानप्राप्त्यै मार्गदर्शनं च अत्यन्तमावश्यकमित्यत्र कस्यापि विप्रतिपत्तिः न स्यात् ।


**श्रीमदहोबिलमठीय-आदर्श-संस्कृत-महाविद्यालयस्य** स्थापनं इतः पञ्चसप्ततिवर्षेभ्यः पूर्वमभवत् । अत्र वेद, दिव्यप्रबन्ध, न्याय, व्याकरण, विशिष्टाद्वैतवेदान्तादिशास्त्रेषु बहूनां छात्राणां सम्यक् अध्यापनं प्रचलति । पटिष्ठप्रज्ञया कार्यशेषनिर्वर्तनक्षमाः अध्यापकाश्च पाठने, संशोधनादौ निरताः अनेकग्रन्थप्रकाशनम्, आधुनिकयान्त्रिकपद्धत्या ज्ञातव्यबह्वंशवैदग्ध्यं प्राप्य कलाशालाछात्राणामपि शोभनमार्गदर्शकाः प्रेरणप्रदाः उत्साहवर्धकाश्च स्युरिति कामये॥

सन्दर्भेऽस्मिन् गुरुकुलपद्धत्या वेद, शास्त्राध्ययनस्य वैशिष्ट्यविषये लेखनमिदं प्रस्तूयते ।

अस्मिन् कैङ्कर्ये कथञ्चित् दासमपि समायोजितवतां श्रीमदहोबिलमठश्रीकार्यधूर्वहाणाम् अस्मत्प्रियसुहृदां विदुषां श्रीमतां तेवनार्विलाहाभिजनानां डॉ. पद्मनाभाचार्याणां च सप्रणामं कार्तज्ञ्यं निवेद्य विरमामि ॥

वाचिकदोषः क्षन्तव्यः ।

शोकहर्तृपुराभिजनः रामानुजदासः,
श्रीमदहोबिलमठास्थानविद्वान्


सुधर्मा
अद्वितीया संस्कृतदिनपत्रिका
श्री वेदान्तदेशिकः
नवचत्वारिंशत्तमविशेषसञ्चिका
SUDHARMA SANSKRIT DAILY
49th Anniversary Special Issue 2018
Founder Editor
Pandit K.N. Varadaja Iyengar